दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper

नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-291





13.08.2024 मंगलवासरः वि.सं. २०८० श्रावणशुक्ल नवमी श्रावण 29 प्रविष्ठांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com


## प्रशासनेन प्रधानमन्त्री-सूर्य-गृह-निशुल्क-विद्युयोजनायाः अन्तर्गतं प्रारूपित-सौर-ग्रामस्य कार्यान्वयनाय एकः

### परिचालन-दिङ्निर्देशः प्रख्यापितः

नवीन एवं नवीकरणीय ऊर्जा मंत्रालय
MINISTRY OF NEW AND RENEWABLE ENERGY
सत्यमेव जयते

हिमसंस्कृतवार्ताः 13 अगस्त। प्रशासनेन प्रधानमन्त्री-सूर्य-घर-मुफ्त बिजली-योजनायाः अन्तर्गतं प्रारूपित-सौर-ग्रामस्य कार्यान्वयनाय एकः परिचालन-दिनिर्देशः प्रख्यापितः। नवीननवीकरणीयोर्जा मन्त्रालयेन समुदीरितं यत् अस्याः योजनायाः अन्तर्गतम् समग्रदेशे प्रतिजनपदे एकं प्रारूप-सौर-ग्रामं निर्मातुं बलं प्रदत्तमस्ति। तथा च अस्म घिटिकाय आहत्य अष्टशतं कोटिरूप्यकाणि आवण्टितानि।

## हस्तशिल्पयोः निर्यातं विक्रयं च संवर्धयितुं विभिन्नाः पदक्षेपाः उत्थापिताः-

### केन्द्रीयवस्त्रमन्त्रीगिरिराजसिंहः



**हिमसंस्कृतवार्ताः 13 अगस्त।** केन्द्रीयवस्त्रमन्त्री गिरिराजसिंहः अभिव्यक्तवान् यत् हस्तवेम- हस्तशिल्पयोः निर्यातं दशिकविक्रयं च संवर्धयितुं विभिन्नाः पदक्षेपाः उत्थापिताः। नवदिल्ल्यां हस्तवेमप्रदर्शन्यां मन्त्री प्रख्यापितवान् यत् सम्प्रति हस्तवेमकर्मकराः राष्ट्रिय-भूषाचार-प्रौद्योगिक-संस्थानेन सह संयोज्यमानाः विद्यन्ते। येन हि ते कर्मकराः नवीनभूषाचारं प्रस्तोतुं शक्नुवन्ति। श्रीसिंहः अग्रे न्यगादीत् यत् हस्तवेमक्षेत्रे भारतस्य अंशः नवतिः प्रतिशतं यावदस्ति। अस्मिक्षेत्राय च पञ्चत्रिंशल्लक्षाधिकं परिवाराः कार्यं सम्पादयन्ति।

## समाचरितः गजदिवसः

### गजानां कृते अनूकूलावासं प्रदातुं सर्वविधसाहायताविषयं पुनरावर्तितवान् नरेन्द्रमोदी

हिमसंस्कृतवार्ताः 13 अगस्त। सोमवासरे विश्वगजदिवसः आचरितः । अयं दिवसः गजप्रजातिनां निम्नदशाः अवलम्ब्य यथा निवासस्थानस्य अल्पता गजदन्तस्य अवधीत्या क्रयणं मनुष्य-गजयोर्मध्ये संघर्षः इत्यादयः ध्यानाकर्षणत्वेन परिपाल्यते।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना कृषिक्षेत्रे अनुसंधान-नवाचारयोः आवश्यकतासु बलं प्रदत्तम्

हिमसंस्कृतवार्ताः 13 अगस्त। प्रधानमन्त्रिणा नरेन्द्र-मोदिना नवदिल्लीस्थे भारत-कृष्यनुसन्धान-संस्थाने जलवायुसमेकित उत्पादाधारितानां सस्यानां नवोत्तरक्कीशत प्रकारकाणि सस्यबीजानि प्रख्यापितानि। एतेषु नवोत्तरकिशतबीजेषु चतुस्त्रिंशत् क्षेत्रीय-शस्यानि, सप्तविंशतिः उद्यानशस्यानि समेत्य अन्य शस्यबीजानि सम्मिलितानि सन्ति। एतदतिरिच्य उद्यानशस्येषु फलानि, शाकानि, पुष्पाणि औषधीय पादपाः च सम्मिलिताः सन्ति। एतेषु विषयेषु कृषक-वज्ञानिकः सह परिचर्चा कुर्वन् प्रधानमन्त्री कृषि क्षेत्रेषु अपि मूल्यवर्धनस्य महत्त्वं सबलं प्रतिपादितवान्।



कृषकः प्रतिपादितं यत् एतानि नवीनानि शस्योत्पादकानि बीजानि अत्यधिकानि लाभप्रदानानि भविष्यन्ति। यतोहि एतानि बीजानि तेषां कृषि-व्ययं न्यूनीकरणं करिष्यन्ति। सममेव पर्यावरणस्य अपि संरक्षणं करिष्यन्ति। असौ प्राकृतिक-कृषेः लाभानि समेत्य जविक कृषि प्रति जनानां संवर्धित-विश्वासस्य विषये अपि परिचर्चा विहितवान्।

## सुभाषितम्

**सुवृत्तः शीलसम्पन्नः**
**प्रसन्नात्मात्मविद्बुधः।**
**प्राप्येह लोके सत्कारं**
**सुगतिं प्रतिपद्यते।।**
**(महाभारत- शान्तिपर्व १६०/२३)**

**भावार्थः**- जो सदाचारी, शीलसम्पन्न, प्रसन्नचित्त और आत्मतत्त्व को जानने वाला है, वह विद्वान् पुरुष इस लोक में सत्कार पाकर परलोक में परम गति पाता है।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११


## भारतीय-प्रतिभूति-विनिमय-मण्डलेन हिण्डन्बर्ग-रिसर्च इत्यस्याः संस्थायाः आरोपाणां खण्डनं कृतम्



**हिमसंस्कृतवार्ताः 13 अगस्त।** अमेरिका-देशस्थितायाः शॉर्ट सेलर हिण्डन्बर्ग-रिसर्च इत्यस्याः संस्थायाः आरोपाणां खण्डनं भारतीय-प्रतिभूति-विनिमय-मण्डलेन कृतम् । देशस्य अनेन अंशापणनियामकेन हितविग्रहसम्बद्धानां विषयाणां निवारणाय पर्याप्तानि आन्तरिकतन्त्राणि सन्ति इत्यपि सूचितम्, येषु प्रकटीकरणरूपरेखा, अस्वीकारस्य प्रावधानं च अन्तर्भवतः । तत्र इदमपि उल्लिखितं वर्तते यत् प्रतिभूति-धारणानां, तेषां च स्थानान्तरणस्य च दृष्ट्या आवश्यकाः प्रासंगिकाः प्रकटीकरणाः अध्यक्षेण यथासमयं कृताः सन्ति। मण्डलेन इदं अपि प्रकाशितं यत् अध्यक्षः सम्भाव्यहितविग्रहसम्बद्धेभ्यः विषयेभ्यः अपि स्वयमेव निवृत्तः अस्ति। सेबी इत्यनेन निवेशकाः निवेदिताः यत्ते एतादृशानां प्रतिवेदनानां प्रतिक्रियां दातुं पूर्वं शान्तमनसा यथायोग्यं परिश्रमं कुर्वन्तु इति।

## स्वतंत्रता-दिवस-समारोहस्य पूर्वं जम्मू-कश्मीरस्य अनेकेषु जनपदेषु त्रिवर्णध्वज समागमाः आयोज्यन्ते



**हिमसंस्कृतवार्ताः 13 अगस्त।** स्वतंत्रता-दिवस-समारोहस्य पूर्वं जम्मू-कश्मीरस्य अनेकेषु जनपदेषु त्रिवर्णध्वज समागमाः आयोज्यन्ते। उपराज्यपालस्य मनोज सिन्हा इत्यस्य नेतृत्वे गतदिने श्रीनगरे विशाल 'त्रिवर्णध्वजयात्रा' कृता, यस्मिन् सहस्रं जनाः भागं भजितवन्तः। डल-सरोवरस्य तटे स्थितस्य शेर-ए-कश्मीर- अन्ताराष्ट्रीय-सम्मेलन-केन्द्रस्य बौटनिकल गार्डन इत्यस्य च मध्ये एषाः जनसभा आयोजिता आसीत् । प्रधानमन्त्रिणा श्रीमोदिना उक्तं यत् जम्मू-कश्मीर-देशस्य त्रिवर्णध्वजयात्रा प्रेरणादायिनी अस्ति। श्री मोदीना उपराज्यपालेन मनोज-सिन्हा इत्यनेन विहितस्य "हर घर तिरंगा" इति अभियानस्य प्रचार-प्रसाराय प्रशंसा कृता। अवधेयं वर्तते यत् नागरिकेषु राष्ट्रप्रेमभावं प्रवर्धयितुं देशे सर्वत्र अस्य मासस्य पञ्चदश दिनाङ्कपर्यन्तं एतत् अभियानं आचर्यते। अस्य उपक्रमस्य अन्तर्गतं प्रशासनेन स्वगृहे त्रिवर्णध्वजम् उत्थापयित्वा ध्वजेन च सह स्वछायाचित्रं गृहीत्वा हर घर तिरंगा अन्तर्जालपटले उपारोपणं कर्तुं जन आग्रहः कृतः। अस्य उपक्रमस्य अन्तर्गतं अभिनेता आर, माधवनः अपि नागरिक स्वगृहेषु राष्ट्रध्वजारोहणम् कर्तुम् आग्रहं कृतवान्।

## बिहारराज्ये जहानाबाद-जनपदस्य सिद्धेश्वर-नाथदेवालये आकस्मिक-रूपेण जातेन जनसम्मर्दैन सप्तजनानां मृत्युः



हिमसंस्कृतवार्ताः 13 अगस्त। बिहारराज्ये जहानाबादजनपदस्य सिद्धेश्वर-नाथदेवालये आकस्मिकरूपेण जातेन जनसम्मर्दैन सप्त जनानां मृत्युः अभवन्। अपि च, एतस्यां घटनायां षोडश जनाः व्रणिताः जाताः। एते जनाः सम्प्रति जहानाबादचिकित्सालये उपचाराधीनाः वर्तन्ते। जहानाबादस्य आरक्षि-अधीक्षकः अरविन्द-प्रतापसिंहः प्रावोचत् यत् ह्यः रात्रौ भक्त-विक्रेत्रोः मध्ये समुत्पन्नेन विवादेन एषः जनसर्मदः समागतः। अस्माकं वार्ताहरः सूचितवान् यत् पवित्र श्रावण-मासस्य चतुर्थं सोमवासरम् अभिलक्ष्य बृहत्मायां सङ्ख्यायां श्रद्धालवः मन्दिरे पूजार्चनां विधातुं एकत्रिताः अभवन्। श्रीसिंहः प्रोक्तवान् यत् आरक्षिणः निरीक्षणं कुर्वन्ति। अप िच, दोषिणः प्रति कठोराचारणं विधास्यते। मुख्यमन्त्री नीतिशकुमारः मृतकपरिवारेभ्यः चतुर्लक्षरूप्यकाणाम् अनुग्रहराशिमपि उद्घोषितवान्।

# NIRF Ranking 2024 : भारतीय प्रौद्योगिकीसंस्थानमण्डी एनआईआरएफ- २०२४ इत्यस्मिन् 'नवाचार' वर्गे अष्टमे स्थाने





हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः 13 अगस्त । भारतसर्वकारस्य शिक्षामन्त्रालयेन संचालितस्य राष्ट्रिय-संस्थागत- क्रमाङ्कन- रूपरेखायाः (एन. आई. आर. एफ.) २०२४ नवीनतावर्गे भारतीयप्रौद्योगिकीसंस्थानं मण्डी इत्यनेन अष्टमस्थानं प्राप्तम्। भारतसर्वकारस्य माननीयशिक्षामन्त्री धर्मेन्द्रप्रधानेन १२ अगस्त २०२४ दिनाङ्के नवीदिल्लीनगरे एनआईआरएफ इण्डिया रैङ्किंग इत्यस्य नवमसंस्करणस्य परिणामस्य घोषणा कृता। नवीनतावर्गे सफलतां विहाय अन्येषु क्षेत्रेषु अपि अस्य संस्थानस्य उल्लेखनीयप्रगतिः अभवत्। IIT Mandi इत्यनेन अस्मिन् वर्षे स्वस्य क्रमाङ्कनं सुदृढं कृत्वा अभियांत्रिकीवर्गे #31, समग्रवर्गे #72 तमे स्थाने च अभवत्। समागमं सम्बोधयन् धर्मेन्द्रप्रधानः अवदत् यत्, “अधिकारपारदर्शिता, निष्पक्षता च सुनिश्चित्य अस्य तन्त्रस्य अग्रे उन्नयनं कर्तुं शिक्षामन्त्रालयेन उच्चशिक्षासंस्थाभ्यः प्रतिक्रियाः निरन्तरं गृहीताः सर्वेषां सार्वजनिक-निजीक्संस्थानां राष्ट्रिय- संस्थागत- क्रमाङ्कन- रूपरेखायां सक्रियरूपेण भागं ग्रहीतुं, यतः एतेन न केवलं तेषां कार्यप्रदर्शनस्य मापनं कर्तुं साहाय्यं भविष्यति अपि तु उच्चशिक्षाक्षेत्रे निरन्तरोन्नयनं च चालयिष्यति। IIT Mandi इत्यस्य उपलब्धेः विषये टिप्पणीं कुर्वन् IIT Mandi इत्यस्य कुलसचिवः डॉ कुमारसंभवः पाण्डेयः अवदत् यत्- "वयं भारतीय प्रौद्योगिकीसंस्थानम् मण्डी इत्यस्य एनआईआरएफ- २०२४ इत्यस्मिन् 'नवाचार' वर्गे अष्टमं स्थानं प्राप्य उत्साहिताः स्म। इयं मान्यता अस्माकं छात्राणां संकायानां च मध्ये तथा च उद्यमशीलतायाः संस्कृतिं पोषयितुम् अस्माकं प्रतिबद्धतां प्रदर्शयति। वयं लक्ष्यान् अग्रे नेतुं देशस्य तकनीकीप्रगतौ नवाचार-पारिस्थितिकीतन्त्रे च योगदानं दातुं प्रतिबद्धाः स्मः।

# Independence Day 2024: स्वातन्त्र्यदिने रामपुरे सांस्कृतिक-कार्यक्रमाः न भविष्यन्ति



हिमसंस्कृतवार्ताः - रामपुरम् 13 अगस्त । रामपुरे खण्डस्तरस्य स्वातन्त्र्यदिवसस्य उत्सवे अस्मिन् वर्षे सांस्कृतिककार्यक्रमाः न भविष्यन्ति। रामपुरस्य समेजे अधुनैव घटिताम् आपदां दृष्ट्वा प्रशासनेन एषः निर्णयः कृतः। सोमवासरे स्वातन्त्र्यदिवसस्य आयोजनस्य विषये उपमण्डलाधिकारिणः (एसडीएम) रामपुरस्य निशांततोमरस्य अध्यक्षतायां सभा आयोजिता। सः अवदत् यत् पद्मसर्वकारीयस्य वरिष्ठमाध्यमिकविद्यालयस्य प्राङ्गणे खण्डस्तरीयकार्यक्रमस्य आयोजनं भविष्यति। अस्मिन् काले मार्च-पास्ट, ध्वज-उत्थापनम्, राष्ट्रगीतं, देशभक्ति-गीतानि च आधारिताः केचन कार्यक्रमाः भविष्यन्ति। सः सूचितवान् यत् हिमाचलपुलिसस्य, एनसीसी, स्थानीयविद्यालयस्य च बालकाः मार्चपास्ट् मध्ये भागं गृह्णन्ति। रामपुरस्य खण्डान्तर्गतस्य सरपारा पंचायतस्य समेजग्रामे ३१ जुलाई मध्यरात्रौ यत् जलोप्लवं जातं तत् दृष्ट्वा खण्डस्तरस्य स्वातन्त्र्यदिवसस्य सांस्कृतिककार्यक्रमस्य आयोजनं न भविष्यति इति निर्णयः कृतः। सेना, एनडीआरएफ, आईटीबीपी, सीआईएसएफ, हिमाचलपुलिस, गृहरक्षक, एसडीआरएफ, अग्निशामकदल सहितं सर्वेषां जनानां कृते ये अन्वेषणकार्यक्रमे भागं गृहीतवन्तः तेषां प्रशासनेन १५ अगस्तदिनाङ्के सम्मानम् भविष्यति।

# HP School Sports News : उच्चाशंकायुतेषु जनपदेषु बृहत् निर्णयः, काङ्गड़ायां ऊनायां च प्रतिबन्धः अपि स्थापितः




हिमसंस्कृतवार्ताः - शिमला। अद्यत्वे राज्ये वर्षाकारणात् प्रतिदिनं क्षतिप्रसंगाः दृश्यन्ते। एतादृशे सति प्रारम्भिकशिक्षाविभागेन अगस्तमासस्य १० दिनाङ्कात् आरभ्यमाणानां क्रीडाप्रतियोगितानां कृते महत् निर्णयः कृतः अस्ति। अस्मिन् यत्र यत्र काङ्गड़ा-ऊना-मण्डी सहितेषु सर्वेषु मण्डलेषु क्रीडास्पर्धाः प्रचलन्ति, यदि वर्षाकारणात् किमपि समस्या अस्ति तर्हि तत्कालं प्रभावेण प्रतियोगितायाः स्थगितीकरणस्य आदेशाः निर्गताः सन्ति। तत्र उक्तं यत्, यावत् अग्रे आदेशः न भवति तावत् स्पर्धाः स्थगिताः भविष्यन्ति। एतेन सह एतत् अपि उक्तं यत् क्रीडास्पर्धायाः कृते ये बालकाः आगच्छन्ति तेषां मातापित्रोः समीपं सुरक्षितरूपेण परिवहनं करणीयम् इति विद्यालयप्रबन्धनस्य दायित्वं भविष्यति।

प्रारम्भिकशिक्षानिदेशकेन उपनिदेशकेभ्यः निर्देशाः निर्गताः यत् सः स्वस्तरेन अस्मिन् विषये निर्णयं कर्तुं शक्नोति। ज्ञातव्यं यत् अद्यकाले राज्यस्य विभिन्नेषु मण्डलेषु क्रीडास्पर्धाः प्रचलन्ति। परन्तु वर्षाकारणात् अनेकस्थानेषु मार्गस्य स्खलनम्, जलस्तरस्य वर्धनं, वृक्षाणां पतनं च इत्यादयः घटनाः भवन्ति। एतादृशी परिस्थितौ बालानाम् जीवनं संकटापन्नं कर्तुं न शक्यते। सर्वेषां मण्डलानां कृते एते आदेशः दत्ताः, परन्तु यत्र वर्षाकारणात् अधिका समस्या वर्तते तत्र एताः क्रीडास्पर्धाः स्थगिताः।

# HPCM: आपदाप्रभावितक्षेत्राणां निरीक्षणं कर्तुं हिमाचलम् आगन्तुं शक्नोति प्रधानमंत्री मोदी- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् प्रधानमन्त्रिकार्यालयस्य पक्षतः मुख्यसचिवेन सह वार्ता कृता। प्रधानमंत्रिणा नरेन्द्रमोदिना आपदाप्रभावितक्षेत्रं द्रष्टुं हिमाचलप्रदेशम् आगन्तुम् इच्छति स्म। परन्तु प्रतिकूलस्य वातावरणस्य कारणात् तस्य भ्रमणं स्थगितम्। सुक्खुः अवदत् यत् आगामिषु कालेषु प्रधानमन्त्री नरेन्द्रमोदी आपदाग्रस्तक्षेत्राणां निरीक्षणं कर्तुम् आगन्तुं शक्नोति। सः अवदत् यत् आगामिषु कालेषु केन्द्रसर्वकारः आपदापश्चात् हिमाचलस्य साहाय्यं करिष्यति इति राज्यसर्वकारः आशास्ति। सूत्रेभ्यः ज्ञायते यत् सोमवासरे प्रधानमन्त्रिणः हिमाचलयात्रा प्रस्ताविता, परन्तु प्रतिकूलस्य वातावरणस्य कारणात् प्रवासं कर्तुं न शक्तवान्।


हिमाचलराजकीयसंस्कृतशिक्षकपरिषद्

द्वारा १६ तः २२ अगस्त पर्यन्तं प्रचालयमानस्य संस्कृतसप्ताहस्य शुभारम्भे आयोज्यते

।।संस्कृतसप्ताहमहोत्सवः २०२४।।

स्थानम्- रा.व.मा.वि.धर्मशाला हि.प्र.

दिनांकः- १६ अगस्त २०२४ प्रातः ११ वादने

मुख्यातिथिः- श्रीयुत हेमराज बैरवा (भा.प्र.से.)

माननीयः उपायुक्तः जनपदः काङ्गड़ा

स्वागतमत्र भवताम्

कार्यक्रमः

- संस्कृतशोभा यात्रा - प्रातः ११ वादने
- उद्घाटनकार्यक्रमः- १२ वादने
- सांस्कृतिकः कार्यक्रमाः- १२:३० वादनात्
- संस्कृतस्य महत्वविषये उद्बोधनम्- ०१:३० वादनात्
- छात्राणां शिक्षकाणाञ्च सम्मानम्- २ वादनात्
- मीडिया प्रैसवार्ता- २:३० वादनात्

# हिण्डन्बर्ग् इत्यस्य "आस्फोटः'" निष्क्रियः जातः, शेयरविपणिः पतनानन्तरं पुनः स्वस्थः भूत्वा, स्थगितः अभवत्






(हिमसंस्कृतवार्ताः - दिलीपः (नादौनम्) अमेरिकी संस्था हिण्डन्बर्ग इत्यस्य सर्वथा कथित मिथ्या कथनानन्तरं सोमवासरे (१२ अगस्त दिनांके) भारतीय-शेयर-विपणौ कोऽपि बहु परिवर्तनं न दृष्टम् । अमेरिका देशस्य संस्था "शॉर्ट सेलर हिण्डन्बर्ग रिसर्च" इत्यस्य प्रतिवेदनस्य विपण्यां किमपि महत्त्वपूर्णं प्रभावः अभवत् । व्यापारस्यान्ते ३० शेयरेषु आधारितं "बम्बई-स्टॉक-एक्सचेंज इत्यस्य "सेन्सेक्सः" केवलं ५६.९८ बिन्दुभिः अथवा ०.०७% न्यूनतां प्राप्य ७९,६४८.९२ बिन्दुषु आगत्य शान्तः अभवत्, यत् अति सामान्य वार्ता अस्ति

अपरे च तस्मिन् एव काले "नेशनल् स्टॉक् एक्स्चेन्ज" इतस्य "निफ्टी" केवलं २०.५० बिन्दुभिः अथवा ०.०८% यावत् स्खलितः अभवत्, दिवसान्ते च यः २४,३४७.०० इति स्तरे प्राप्य स्थगितः अभवत् ।

अद्य व्यापारिणः कम्पनयः च भारतीयविपण्यां स्वविश्वासं दृढतया दर्शयित्वा , हिण्डन्बर्गं विपक्षे भारतीयमुद्राम् स्थिरिकृतम्।

## डॉलरस्य सम्मुखे रुप्यकस्य दशा पुनः न्यूना

विगते दिवसे सोमवासरे रुप्यकस्य मूल्यं सीमितपरिधिषु उद्घाटितम्, परन्तु पश्चात् तस्मिन् आरोहावरोह दृष्टम् । अन्तरवित्तकोष-विदेशीयविपणीषु रुप्यकस्य मूल्यं ८३.९५ इति मूल्ये उद्घाटितम् तथा च ८३.९८ इत्यस्य अन्तर्दिवसस्य न्यूनतमं स्तरं स्पृष्टम् अन्ते च अमेरिकी मुद्रायाः विरुद्धं ८३.९७ (अस्थायी) इति मूल्ये समाप्तम्, यत् पूर्वसमाप्तेः अपेक्षया पैसाद्वयं न्यूनमस्ति

## भारतीय विपण्याम् सुवर्ण - रजतयोः स्थितिः

२०२४ तमस्य वर्षस्य अगस्तमासस्य १२ दिनाङ्के सोमवासरे भारत देशे सुवर्णरजतयोः मूल्येषु किञ्चित् न्यूनता दृष्टा । दिल्लीनगरे २४ कैरेट् सुवर्णस्य मूल्यं प्रति १० ग्रामं ७०,४५० रूप्यकाणि यावत् न्यूननासीत् , मुम्बई, चेन्नैई , कोलकाता इत्यत्र तु प्रति १० ग्राम् ७०,३०० रूप्यकाणि यावत् अभवत्। रजतस्य मूल्यं अपि प्रतिकिलो ८३,००० रूप्यकाणि यावत् न्यूनमेव आसीत् ।

# भारतस्य मालदीवयोः सम्बन्धेषु सुदृढतायैः पुरातनानुबन्धपत्रमेकं नवीनं कृतम्




**हिमसंस्कृतवार्ताः 13 अगस्त**। विदेशमन्त्री डॉ एस जयशंकरः तस्य च मालदीवस्य समकक्षः मूसाजमीर इत्येषः नवविंशत्यधिक-द्विसहस्रतमवर्षपर्यन्तं चतुर्विंशत्यधिक-द्विसहस्रतमवर्षतः सहस्रं जनसेवाधिकारिणां क्षमतानिर्माणार्थं अस्य मासस्य नवमे दिनांके मालदीवदेशस्य राजधान्यां पुरातन अनुबन्धपत्रमेकं नवीनं कृतवन्तौ। येन भारतस्य मालदीवस्य च सम्बन्धः सुदृढो भविष्यति।

# विकसितभारतस्य दिशि देशस्य युवकानां महत्वपूर्णा भूमिका-क्रीडामन्त्री डॉ. मनसुख मण्डाविया




हिमसंस्कृतवार्ताः 13 अगस्त। केन्द्रीययुवाकार्याणि तथा क्रीडामन्त्री डॉ. मनसुख मण्डाविया उक्तवान् यत् २०४७ तमवर्षपर्यन्तं विकसितभारतस्य स्वप्नस्य सफलीकरणे युवानां महत्त्वपूर्णा भूमिका अस्ति। गतदिने अहमदाबादनगरे 'Impact with Youth Conclave 2024' इति कार्यक्रमे वदन् श्री माण्डविया उक्तवान् यत् भारतं युवादेशः अस्ति तथा च विकसितराष्ट्रस्य दृष्टिः प्राप्तुं प्रत्येकं नागरिकस्य सामूहिकदायित्वम् अस्ति, परन्तु अस्मिन् कार्ये युवानां विशेषा भूमिका अस्ति .

# (४३३) स्वरोदयः व्यवस्था..







स्वरोदयःयदि क्रमीकरणसिद्धान्तः एकवादात् द्वैतवादपर्यन्तं स्तरेषु प्रयुक्तः भवति तर्हि वयं एकं, द्वौ, त्रयः, पञ्च, सप्त, चतुःविंशतिः, षट्त्रिंशत्, षड्वतिः अथवा वास्तविकतायाः अभिव्यक्तिस्तराः वक्तुं शक्नुमः एवं उच्चतमैकस्तरस्य प्राणः एकः, स्पन्दनम् (स्पन्दात्मा) स्वभावः वा गुणः वा । अधमस्तरस्य द्वैतस्य विरोधस्य वा प्रतीकं प्राणापानम् । ततश्च प्राणापानसमान इति त्रिविधः प्राणापानसमना उदानव्यान इति पञ्चगुणः यत् सूत्रं सर्वेषां स्तरानाम् माध्यमेन निर्वाह्यते। एतत् सत्यम् अन्येषु सर्वेषु पक्षेषु यथा नाडी , स्वरः, धातुः इत्यादिषु तथापि स्वरोदयः व्यावहारिकरूपेण द्वौ, त्रीणि, पञ्च च स्तरेषु स्वस्य ध्यानं केन्द्रीकृत्य प्रत्येकस्मिन् क्षेत्रे तेषां तदनुरूपप्रयोगविधानस्य उपयोगं करोति। सृष्टौ सर्वं मूलद्वयस्य सामान्यतः त्रयाणां व्यावहारिकतया पञ्चानां च परिणामत्वेन क्रमसंयोगेन सांख्यस्य पुरुष -प्रकृतेः द्वन्द्व-सिद्धान्तस्य विस्तारत्वेन त्रिवृत-करणं वा पञ्ची करणं वा इति उच्यते। स्वरोदयस्य कृते पञ्चमहाभूतेभ्यः सृष्टिः पञ्चगुणाभिव्यक्तिद्वारा विकसिता भवति । तेषां क्रमिकरूपेण चक्रीयक्रान्तिः भवति, प्रबलतायाः निद्रायाः च अधीनः इति वक्तुं शक्यते, तदपि हिन्दुपञ्चाङ्गस्य कालस्य, प्रमाणस्य, एककानां सम्बन्धे, तालमेलेन च। एतेन क्रमेण पञ्चमहाभूतपञ्चतन्मात्रयोः योजनायाः प्रतीकम् । दुष्प्रभावाः अपि वा यत् वयं नकारात्मकप्रभावं वदामः तत् ब्रह्माण्डचक्रस्य व्यक्तिगतचक्रेण कृता हिंसा वा उल्लङ्घनं वा एव । यद्यपि स्रोते अर्थात् परमवास्तविकतायां एतस्य मूल्यं नास्ति इति भासते तथापि दैनन्दिनसाधारणजीवने तस्य शाश्वतं मूल्यं भवति एव। सामञ्जस्यस्य सिद्धान्तः च सृष्टि-प्रकटीकरण-क्रमे विसंगतिः द्वन्द्व-सुख-दुःख-धर्म-अधर्म-पुरुष-प्रकृति-दिन-रात्रौ, उष्ण-शीत-प्रकाश-अन्धकार-सकारात्मक-नकार-आदिषु अपि अवतरति, रूपं च गृह्णाति च अण् भारतीय संस्कृतेः नैतिक-धार्मिक आधार। भारतीयदर्शनेन विविधाः विचारधाराः उत्पन्नाः। परमवास्तविकतातः विलक्षणवास्तविकतापर्यन्तं सिद्धान्तानां संख्या एकप्रकारस्य धर्मस्य, धर्मशास्त्रस्य, सृष्टेः प्रक्रियायाः, आध्यात्मिकस्य लक्ष्यस्य, व्यावहारिकस्य उपयोगितायाः इत्यादीनां उपरि निर्भरं भवति जैनधर्मं, बौद्धधर्मं, चार्वाकं च त्यक्त्वा भारतीयसंस्कृतेः जन्म अभवत् अद्वैत (एकवाद) तः सांख्य (द्वैतवाद) इत्यादयः अन्ये बहवः विचारधाराः । समग्रतया सृष्टेः समग्रयोजनायाः पिरामिडसदृशस्य - शङ्कुरूपस्य वा शङ्कुसदृशस्य संरचनायाः स्वरूपं ददाति । एतेषां सिद्धान्तानां प्रत्यक्षतया परोक्षतया वा सर्वे आध्यात्मिकाः वैज्ञानिकाः च विषयाः प्रभाविताः अभवन् । सिद्धान्तानां परिकल्पना गणना च आध्यात्मिकसाक्षात्कारस्य अथवा द्रष्टुः दृष्टेः गभीरतायां वा ऊर्ध्वतायां वा आधारिता अस्ति, यत् पश्चात् तर्कपदेषु निक्षिप्तं भवति, तर्कस्य गणितस्य च साहाय्येन सम्पूर्णं श्रद्धाव्यवस्थां निर्मातुं प्रयत्नरूपेण, धर्मशास्त्र, दर्शन, तत्वमीमांसा, ब्रह्माण्ड विज्ञान, नैतिकता, विधि आदि। यतः, स्वरोदयः एकवादं स्वस्य उच्चतमं सिद्धान्तं स्वीकुर्वति तस्मात् सः स्वयमेव एकं व्यवस्थां निर्मातुम् अर्हति स्म, व्यापकं च आशङ्कितं च प्रकृतौ। एतस्य अनुप्रयोगेन प्रदर्शितं यत् एषा एवं एकमात्रं प्रणाली अस्ति यत् प्राचीनभारतीयद्रष्टाभिः विश्वाय प्रदत्ता, एतैः सर्वैः विशेषताभिः योग्यता प्राप्ता । अनुसृतः विधिः आत्मसाक्षात्कारः एव । भारतीयः दृष्टिकोणः मूलतः जीवनं प्रति अन्तः अन्वेषणं भवति, न तु बहिः अन्वेषणं तथा च अन्तः जीवनं एव बहिः जीवनं शासयति, एषः एव वैदिकसंस्कृतेः मार्गः। संकलितम् अनुवादितम् क्रमशः ..... सुधा साठ्ये मुंबई।

# राष्ट्रियसंस्थागतक्रमाङ्कनरूपरेखायां २०२४ तमे वर्षे भारतीयप्रौद्योगिकीसंस्था मद्रासः समग्रवर्गे शीर्षस्थाने अतिष्ठत्




हिमसंस्कृतवार्ताः 13 अगस्त। भारतीयप्रौद्योगिकीसंस्था मद्रासः समग्रवर्गे उच्चशिक्षासंस्थानां कृते राष्ट्रियसंस्थागत-क्रमाङ्कनरूपरेखायां २०२४ तमे वर्षे शीर्षस्थानं प्राप्तवती अस्ति । भारतीयविज्ञानसंस्था बेङ्गलूरु द्वितीयस्थाने, भारतीयप्रौद्योगिकीसंस्था बम्बई तृतीयस्थाने च अस्ति। केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानेन गतदिने नवदिल्लीनगरे एतत् क्रमाङ्कनं प्रकाशितम्। श्री प्रधानः उक्तवान् यत् राष्ट्रियशिक्षानीतिः २०२० इत्यस्य प्रमुखाः विशेषताः क्रमाङ्कनं मान्यता च अस्ति। अस्मिन् क्रमे सर्वा शिक्षणसंस्थाः संलग्नाः भवेयुः । सः अवदत् यत् देशे वर्तमानानाम् ५८ सहस्राधिकानां शिक्षणसंस्थानां मध्ये ६ सहस्राणि ५०० संस्थाः अस्यां प्रणाल्यां समाविष्टाः सन्ति। सः सर्वेभ्यः निजीसार्वजनिकसंस्थाभ्यः आह्वानं कृतवान् यत् ते प्रतियोगितायाः प्रोत्साहनार्थं अस्मिन् नूतने व्यवस्थायां सम्मिलितुं आवेदनं कुर्वन्तु। विश्वविद्यालयवर्गे भारतीयविज्ञानसंस्था बेङ्गलूरु, जवाहरलालनेहरू विश्वविद्यालयनवीदिल्ली, जामिया मिलिया इस्लामिया नवदिल्ली च शीर्षत्रयेषु सन्ति। प्रबन्धविभागे भारतीयप्रबन्धनसंस्था अहमदाबादः शीर्षस्थाने अस्ति । द्वितीयस्थाने भारतीयप्रबन्धनसंस्था बेङ्गलूरु तृतीयस्थाने च भारतीयप्रबन्धनसंस्था कोझिकोडः । अखिल भारतीय चिकित्सा विज्ञान संस्थान, दिल्ली चिकित्सा शिक्षावर्गे प्रथमस्थाने वर्तते।